# संस्कृतप्रत्ययाधारितं सङ्गणकसहानुदेशनम्
# (छात्राभिवृत्त्युपलब्ध्योः परिप्रेक्ष्ये)

डॉ.मनमोहनशर्मा
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
manmohansharma400@gmail.com

**शोधसारांशः**

आदिकालात् एव भारतवर्षः ज्ञानस्य कोषो वर्तते। यद्यपि ज्ञानस्य विकासचक्रमत्रापि प्रतिक्षणं प्रचाल्यमानमस्ति, तथापि ज्ञानरूपवृक्षस्य बीजमारम्भादेव भारते विद्यमानमासीत्। भारतवर्षे ज्ञानस्य तथा सम्मानमासीत् यदत्र आदिग्रन्थस्य नाम ***'वेदः'*** इति विहितम् । वेदस्यार्थः ज्ञानमिति । इदं ज्ञानमेव भारतीयानामुपास्यमस्ति । वैदिकवाङ्मयः ज्ञानसागरः अस्ति । यस्य गाम्भीर्यं विस्तारश्चानन्तो वर्तते । चतस्रः संहिताः, तासां सहस्राधिकाः शाखाः ब्राह्मणग्रन्थाः आरण्यकाः उपनिषदः उपवेदाः षड् वेदाङ्गानि च आहत्यासंख्यकाः ग्रन्थाः भवन्ति, तेषु च अद्याधिकांशाः विलुप्तप्रायाः सञ्जातास्सन्ति।
विश्वस्य सनातनं सर्वविधकल्याणसाधकं ज्ञानं मन्त्रब्राह्मणात्मको वेद एव । अतः साङ्गवेदाध्ययनमपरिहार्यं भवति । तथाहि गोपथब्राह्मणे ***'षडङ्गविदस्तत्तथा धीमहे'*** [1] इति उपदिष्टं ***'ब्राह्मणेन निष्कारणः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति'***[1] महाभाष्योक्त्या वेदस्य षट्संख्यायकानि अङ्गानि सन्तीति ज्ञायते । तानि शिक्षा कल्पः निरुक्तं छन्दः ज्योतिषं व्याकरणञ्चेति प्रसिद्धानि सन्ति । उक्तञ्च पाणिनीयशिक्षायाम् —

***छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।***
***ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते ।।***
***शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।***
***तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।***[1]

***'प्रधानञ्च षट्सु अङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति'***[1] इत्थं भगवता भाष्यकारेण व्याकरणस्य प्राधान्यत्वं प्रतिपादम् ।
व्याकरणमस्ति वेदस्यान्यतमं महनीयमङ्गमिति इदानीं व्याकरणस्य लक्षणं विवेच्यते ।
***'व्याक्रियन्ते, असाधु साधुशब्देभ्यः साधुशब्दाः पृथक्क्रियन्ते येन तद् व्याकरणमिति'*** करणव्युत्पत्त्या असाधुशब्दावधिकसाधुशब्दकर्मकपृथक्कृतिपूर्वकसाधुशब्दविषयकज्ञानकरणं व्याकरणमित्यर्थः लभ्यते।
व्याकरणं कामपि भाषां नियमबद्धां करोति, येन भाषा दोषरहिता, प्रामाणिकी च भवति, मानवजीवने भाषायाः अत्यधिकं महत्त्वम् अस्ति सन्दर्भेऽस्मिन् उक्तं भर्तृहरिणा यत्-

***इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।***
***यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते।।***[1]

## व्याकरणशिक्षा

व्याकरणशिक्षायाः सन्दर्भे चर्चा यदि क्रियते तर्हि भाषायाः चर्चा सहजतया आपतति। भाषाव्यवहारः श्रवण-भाषण-पठन-लेखनाद्यनुभवजन्यो भवति। प्रथमतः बालकः व्याकरणं नाधिगम्यते अपितु व्यवहारेणैव भाषां जानाति। यद्यपि भाषाशिक्षणं व्यवहाराश्रितं तथापि व्याकरणस्य महत्त्वपूर्णस्थानं वर्तते। वाक्यसंरचनाशैलीं प्रयोगवैशिष्ट्यम् उच्चारणदक्षतां तथा पदपदार्थज्ञानमविज्ञाय भाषायाम् अधिकारः प्रयोगवैशिष्ट्यञ्च नैव शक्यम्। अतः भाषाशिक्षायाम् अस्ति कश्चित् प्रमुखो भागो व्याकरणशिक्षायाः । उक्तञ्च-

***'यद्यपि बहुनाधीषे, तथापि पठ पुत्र व्याकरणम्।***
***स्वजनः श्वजनो मा भूत्, सकलं शकलं सकृत् शकृत् ।।***

वर्णोच्चारणज्ञानमन्तरेण न वैदुष्यं न च शास्त्रज्ञत्वं प्राप्तुं शक्यते । वर्णोच्चारणज्ञानं, शब्दापशब्दज्ञानं, प्रकृतिप्रत्ययज्ञानं, विविधशब्दनिर्माणप्रक्रियाज्ञानञ्च व्याकरणेनैव अवाप्तुं शक्यते। अतः आबालवृद्धं व्याकरणस्य महत्त्वमस्ति। व्याकरणाद् ऋते शुद्ध-

शब्दज्ञानं परिष्कृतशब्दप्रयोगश्च न सम्भाव्यते। अत एव भगवता भर्तृहरिणा उक्तं ***'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः'*** [1] ***'दृष्ट्वा रूपे व्याकरोत् सत्यानृते प्रजापतिः अश्रद्धामनृते दधाच्छ्रद्धां सत्ये प्रजापतिः।'*** [2] इति यजुर्वेदीयमन्त्रेण सत्यासत्यविवेचनमपि व्याकरणशब्देन समर्थयते। ***'वाग् वै ब्रह्म'*** [3] ***'वाग्घिब्रह्म'*** [4] ***'ते मृत्युमतिवर्तन्ते ये वै वाचमुपासते'*** [5] इत्याद्याः श्रुतयोऽपि वाचो व्याकृतिरूपोपासनया व्याकरणस्य दार्शनिकं महत्त्वं प्रतिपादयन्ति । न केवलं शाब्दिकैरेव व्याकरणं प्रशस्यते, अपि तु विविधशास्त्रपारदृश्वद्भिर्विद्वत्तल्लजैरपि इदमभिनन्द्यते । काव्यशास्त्रतत्त्वमूर्धन्यः काव्यप्रकाशकारो मम्मटोऽपि वैयाकरणानां तत्त्वज्ञतां प्रतिपादयन् अभिधत्ते - ***'बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः'*** [6] इति ।

निष्कर्षरूपेण इदं वक्तुं शक्यते यत्-

> ***केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः***
> ***न स्नानं न विलेपनं न कुसुमं नालङ्कृताः मूर्धजाः***
> ***वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते***
> ***क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम्।।*** [7]

इत्यस्मिन् श्लोके भाषा एव पुरुषस्य वास्तविकमाभूषणत्वेन अभिहिता, सा च भाषा संस्कृता संस्कारयुक्ता चेति। भाषायाः संस्काराः, सनातनत्वं नियमबद्धता दोषरहितत्वं परिशुद्धता च सन्ति । कस्यामपि भाषायामेते गुणाः व्याकरणमतिरिच्य न केनापि उपायेन साधयितुमर्हाः वयम् । अतः व्याकरणस्य व्याकरणशिक्षायाः वा महत्त्वमावश्यकतायाः विषये संशयः अविवेकत्वस्य परिचायक एव।

## व्याकरणशिक्षणपद्धतयः

व्याकरणस्य शिक्षणं वैदिककालादेव क्रियमाणमस्ति । कालान्तरे व्याकरणशिक्षणपद्धत्यामपि परिवर्तनमभवत् । एवं सति व्याकरणशिक्षणस्य पद्धतिः द्विधा विभक्ता । प्रथमा परम्परागतपद्धतिः अथवा गुरुकुलपद्धतिः वा द्वितीया च आधुनिकपद्धति अथवा विद्यालीयव्याकरणशिक्षणपद्धतिः।

पारम्परिकी अथवा गुरुकुलपद्धतिः- वैदिककाले साङ्गवेदानामध्ययनं जायते स्म। अतः तदर्थं छात्राः गुरुकुले उषित्वा ज्ञानार्जनं कुर्वन्ति स्म, गुरुकुले सर्वेऽपि जीवनोपयोगिविषयाः पाठ्यन्ते स्म, विषयस्य अधिगमाय विभिन्नाः विधयः आचार्यैः प्रयुज्यन्ते स्म । यथा-

- सूत्रविधिः, कण्ठस्थीकरणविधिः, वादविवादविधिः , व्याख्याविधिः, आगमनविधिः, निगमनविधिः, व्यतिरेकविधिः, समस्याविधिः, प्रतिपदपाठविधिः, मौखिकविधिः, वृत्तिविधिः, भाष्यविधिः/वाक्योपवाक्यविधिः, प्रक्रियाविधिः, कोषविधिः, शास्त्रार्थविधिः, प्रश्नोत्तरविधिः, दृष्टान्तविधिः

वस्तुतः पद्धत्याः अस्याः प्रमुखं वैशिष्ट्यं गुरुः आसीत् । गुरुः खलु छात्रविषयोर्मध्ये सेतुत्वेन उपतिष्ठति स्म । छात्राचार्ययोः उपवासमपि अस्याः पद्धत्याः वैशिष्ट्यं भवति, आचार्यः विद्यादानं स्वकर्तव्यमितिमत्वा अध्यापयति स्म ।

## आधुनिकपद्धतिः

यथा सामाजिकार्थिकराजनीतिकपरिस्थितौ परिवर्तनमभवत् तथैव शिक्षापद्धत्यामपि परिवर्तनं जातम्। परिवर्तनस्यास्य प्रतिफलमस्ति शिक्षायाः आधुनिकपद्धतिरिति। अस्यां पद्धत्यां छात्राः विविधविषयाणामध्ययनं तत्तद्विषयविशेषज्ञैः अध्यापकैः निश्चितसमयात्मककालांशेषु, निश्चितस्थले अर्थात् विद्यालये प्रतिदिनमागत्य कुर्वन्ति। अध्यापकाः विविधनूतनशिक्षणविधिना विविधशैक्षिक-सहायकोपकरणानाञ्च प्रयोगेण विषयं पाठयन्ति।

केचन आधुनिकशिक्षणविधय एवं सन्ति।

---

[1] वाक्यपदीयम् ब्रह्मकाण्डम्, 29, पृ. 182
[2] शुक्लयजुर्वेदः 19/17
[3] बृहदा. उ. 4/1/2
[4] ऐ. ब्रा. 2/15
[5] बृहदा. उ. 2/4/5
[6] काव्यप्रकाश (उच्छवासः 1) पृ. 19
[7] नीतिशतकम्, श्लो. 19

- आगमननिगमनविधि:, ह्यूरिस्टिकविधि:, भण्डारकरविधि:, प्रत्यक्षविधि:, शिविरविधि:, प्रयोजनाविधि:, समस्याविधि:, अनौपचारिकविधि:, निदर्शनविधि:, इतिहासविधि:, अभिनयविधि:, अनुवादविधि:, पाठ्यपुस्तकविधिरित्यादय:।

आधुनिकशिक्षणपद्धत्यां व्याकरणशिक्षणसमस्या: शिक्षाया: रूपे नित्यनिरन्तरं परिवर्तनं जायमानमस्ति, युगोऽयं अत्याधुनिकशिक्षाया: वर्तते तथा अत्याधुनिक शिक्षापद्धत्यामत्याधुनिकशिक्षणविधय: अध्ययनाध्यापनयो: साधनत्वेनोपयुज्यन्ते। दशायामस्यां व्याकरणशिक्षणे नैका: समस्यास्समुद्भूतास्सन्ति। छात्रशिक्षकयो: सन्दर्भे अत्याधुनिकशिक्षणव्यवस्थायां काश्चन-प्रमुखा: समस्या एवं सन्ति —

## व्याकरणशिक्षणे शिक्षकैरनुभूयमानास्समस्या:

१. विघटित: पाठ्यक्रम:।
२. विषयं प्रति छात्राणामरुचि:।
३. अत्याधुनिकाध्यापनसहायकोपकरणानामभाव:।
४. सत्यामाधुनिकशिक्षणयन्त्राणामपि पाठ्यवस्तूनामभाव:।
५. छात्राणां न्यूना शैक्षिकोपलब्धि:।

एता: समस्या: संस्कृताध्यापकै: प्रामुख्येन अस्यामाधुनिकात्याधुनिकशिक्षणपद्धत्यां अनुभूयन्ते।

## व्याकरणाध्ययने छात्रैरनुभूयमानास्समस्या: -

१. पाठ्यक्रमस्यावगमने समस्या।
२. अध्ययने औदासीन्यम्।
३. अध्ययनाय विविधसामग्रीणामभाव:।
४. सत्यामाधुनिकशिक्षणयन्त्राणामपि पाठ्यवस्तूनामभाव:।
५. अध्ययने अरुचि:।

इत्येता: प्रमुखा: समस्या: छात्रै: संस्कृताध्ययने अनुभूयन्ते।

## सङ्गणकसहानुदेशनस्य अर्थ:

इयमेका तादृशी अधिगमप्रणाली वर्तते । यस्यां छात्र: आवश्यकाधिगमसामग्र्या: युक्तसङ्गणकमाध्यमेन उपयोगिनीम् अन्त:क्रियामुद्दिश्य अनुसृत्य वा प्रचलति । यत: अनया छात्र: स्वक्षमतामधिगमगतिञ्चानुसरन् वैयक्तिकरूपेण स्वाधिगमं तथोचितं मार्गदर्शनं प्रापयन् वाञ्छिताधिगमात्मकोद्देश्यानां समुचितरूपेण प्राप्तौ समर्थो भवति । अनया दृष्ट्या सङ्गणकेनायोजितं सङ्गणक-सहानुदेशनमभिक्रमितानुदेशन-शिक्षण-यन्त्राभ्यां प्राप्तानु-देशनाभ्याम् अधिकोन्नतं नवीनं तथा चोपयोगि अनुदेशनमस्ति इति ।

उपर्युक्तविवेचनस्य पुष्टिं नयन्त: डॉ. एस.के. मंगल: सङ्गणकसहानुदेशनस्यायमाशय: अप्रकटयत्- यत् ***"कम्प्यूटर सहानुदेशन एक ऐसी अनुदेशन प्रणाली है जिसमें एक विद्यार्थी और आवश्यक अनुदेशनात्मक सामग्री से युक्त कम्प्यूटर के मध्य उपयोगी अन्त:क्रिया इस उद्देश्य के साथ चलती रहती है कि विद्यार्थी को अपनी योग्यता और गति के अनुसार वैयक्तिक रूप से स्वानुदेशन प्राप्त करते हुए वाञ्छित अनुदेशनात्मक उद्देश्यों की प्राप्ति सम्भव हो सके।"***[8] तथा सङ्गणकसहानुदेशने अधिगमकर्तु: सङ्गणकाभिक्रमस्य तथा च विशिष्टोद्देश्योपस्थितिरावश्यकी मन्यते ।

अनुदेशनेन निम्नप्रकारका: पाठा: प्रस्तोतुं शक्यन्ते ।

१. अनुवर्गविधि:
२. ड्रिल एवं अभ्यासविधि:
३. अन्वेषणात्मकविधि:
४. अनुकरणीयविधि:
५. क्रीडाविधि:

---

[8] Manhal S.K. Educational Technology. P. 220/221

अस्या: पद्धत्या: काश्चन मान्यतास्सन्ति। ता: यथा-

- एकस्मिन्नेव समये नैकेभ्य: छात्रेभ्योऽनुदेशनप्रदानम्।
- छात्राणां निष्पत्ति: स्वतोऽभिलिखिता भवति।
- पद्धतीनां प्रविधीनाञ्च प्रयोगे वैविध्यमादय:।

## सङ्गणकसहानुदेशनस्य लाभा:

सङ्गणकसहानुदेशने अध्यापकछात्रयो: मध्ये तथैवान्त:क्रिया व्यक्तिगतस्तरे सम्भवा अस्ति यथा अनुवर्गपद्धत्यां शिक्षकछात्रयो: प्रचलति।

सङ्गणकेन छात्रेभ्य: व्यक्तिगतरूपेण अनुदेशनसामग्री प्राप्ता भवति। सङ्गणकेन प्रदर्शितानुदेशनसामग्र्या: लाभं स्वीकुर्वन् छात्रा: अनुक्रियां कुर्वन्ति तथा ता: अनुक्रिया: सङ्गणकेन संचयी क्रियते । अनन्तरं तासामेवानुक्रियाणामाधारेण छात्रेभ्य: अग्रे अनुदेशनसामग्री प्रदीयते। छात्रसङ्गणकयो: मध्ये या अन्त:क्रिया भवति तया अनुदेशनात्मकोद्देश्यानां प्राप्ति: भवति। ननु इदं तु निश्चितमेव यत् अस्मिन् आधुनिके शिक्षाजगति सङ्गणकसहानुदेशन-सदृशाणां प्रविधीनाम् अत्यन्तमहत्त्वपूर्णं स्थानमावश्यकता तु सिद्धा एव।

## व्याकरणे प्रत्ययसमीक्षणम् -

आचार्यभर्तृहरिणा दीप्यमानसंसारस्य कारणं 'शब्द' एवेति निगदितम्, दर्शनेषु तु शब्दस्य जगत्कारकत्वमपि स्वीक्रियते। ते च शब्दा: लौकिकवैदिकभेदेन द्विधा- लौकिकाशशब्दास्तु संस्कृतापभ्रंशभेदेन द्विधा। संस्कृतशब्दान् विवेचितुं व्याकरणमेव सर्वसाधनमस्ति, शब्दोच्चारणज्ञानमन्तरेण न वैदुष्यं न च शास्त्रज्ञत्वं प्राप्तुं शक्यते। शब्दोच्चारणज्ञानम्,शब्दापशब्दज्ञानम्, प्रकृति-प्रत्ययज्ञानम्, विविधशब्दनिर्माणप्रक्रियाज्ञानञ्च व्याकरणेनैव अवाप्तुं शक्यते, व्याकरणाद् ऋते शुद्धशब्दज्ञानं परिष्कृतशब्दप्रयोगश्च न सम्भाव्यते। उक्तञ्च भगवता पतञ्जलिना- ***'एक: शब्द: सम्यग् ज्ञात: शास्त्रान्वित: सुष्ठु प्रयुक्त: स्वर्गे लोके च कामधुग् भवतीति।'***[9] एकस्यापि शुद्धस्य शब्दस्य ज्ञानं सुप्रयोगश्च स्वर्गे लोके कामधुक्त्वेन प्रशस्यते। ***'साधुत्वज्ञानविषया सैषा व्याकरणस्मृति:।'***[10]

भगवता भर्तृहरिणा वाक्यपदीये निर्दिशन् साधुत्वज्ञानार्थं व्याकरणस्यानिवार्यत्वम् उपदिश्यते।

आचार्यभर्तृहरेरूपदेशानुसारं जगदिदं शाब्दिकमेव एवमेव तर्कसंग्रहे ***'वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं तु शब्द:'***[11] अर्थात् वाक्यार्थस्य यद् ज्ञानं वर्तते तदेव शाब्दज्ञानम् अथवा शाब्दबोधोऽस्ति, तस्य च साधक: शब्दो वर्तते। मुक्तावल्यामियमेव वार्ता विस्तृतरूपेण विलिखिता अस्ति ***'पदज्ञानं तु करणम्, द्वारं तत्र पदार्थधी:, शाब्दबोध: फलं तत्र, शक्तिधी: सहकारिणी' तथा आसक्ति-योग्यताऽकांक्षातात्पर्यज्ञानमिष्यते'***[12] अर्थात् पूर्वं पदानां (सुबन्त-तिङन्त अव्ययादीनां) ज्ञानं भवति, तदा पदेभ्य: शक्ते: (शब्दनिष्ठ अभिधा लक्षणारूपवृत्ते:) ज्ञानस्य सहाय्येन पदार्थानां (शक्यलक्ष्यार्थानां) उपस्थिति: भवति तदानीम् आकांक्षा योग्यता आसक्ति: तथा तात्पर्यस्य ज्ञानेन शाब्दबोध: फलित: सम्भवति।

शाब्दबोधेन एव जगत: व्यवहारं गतिमवाप्नोति अत: शब्दस्य अत्यन्तं महत्त्वपूर्णं स्थानं विद्यते। भाषायां वाक्यस्यैव प्राधान्यं भवति तदेव प्रवृत्ते: निवृत्ते: वा जनक: वर्तते। वाक्ये पदपदार्थौ प्रकृतिप्रकृत्यार्थौ प्रत्ययप्रत्ययार्था: च काल्पनिका: एव सन्ति। परन्तु इयं प्रकृतिप्रत्यययो: संकल्पना एव शब्दस्य भाषायाश्च संस्कार: वर्तते।

यद्यपि व्याकरणशास्त्रे वाक्यस्य प्राधान्यं वर्तते। तथापि पदानां वर्णनं व्याख्यानञ्च पाणिने: प्रमुखमुद्देश्यमस्ति। न्यायभाष्यकारेण कथितं यत् ***'समयज्ञानार्थं चेदं पदलक्षणाया वाचोऽन्वाख्यानं व्याकरणं, वाक्यलक्षणाया वाचोऽर्थलक्षणम्'*** वस्तुत: इदं पदमेव प्रयोगार्हं भवति। अपदस्य वाक्ये प्रयोग: न क्रियते। प्रत्येकस्मिन् पदे विभागद्वयं भवति-प्रकृति: प्रत्ययश्च। प्रकृतौ तावत् धातु: प्रातिपदिकञ्च अन्तर्भवत:, प्रत्ययस्य तावत् नैका: भेदास्सन्ति। शब्दरूपस्य सुतस्य मातापितरौ भवत: प्रकृतिप्रत्ययौ द्वयोरेव समानं महत्त्वं भवति। परन्तु शब्दनिर्माणप्रक्रियायां प्रत्ययस्य योगदानमधिकं भवति। प्रत्ययेन निश्चितं भवति यत् शब्दे, स्वर: क:? किञ्च लिङ्गं? कीदृशी च रूपरचना भविष्यति इति।

---

9 महाभाष्यम् 6/1/48
10 वाक्यपदीयम्, बह्मकाण्डम्, 29 पृ.182
11 तर्कसङ्ग्रहः (शब्दनिरूपणम्/5)
12 न्यायसिद्धान्तमुक्तावली (शब्दप्रामाण्यनिरूपणम्) 81, पृ. 263-265

प्रत्ययसमीक्षणे पूर्वं कोषग्रन्थेषु उल्लिखितानां प्रत्ययशब्दस्य नानार्थानां ज्ञानम् आवश्यकं भाति इति। अत: पूर्वं विभिन्नकोषग्रन्थेषु प्रदत्ता: नानार्था: अनुशीलनीया:।

***प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु। रन्ध्रे शब्देऽयानुशयो दीर्घद्वेषानुतापयो:।।***[13]

***प्रत्ययनम्। प्रतीयतेऽनेन वा। प्रत्ययेति, इति वा।***

***'प्रत्यय: शपथे रन्ध्रे विश्वासाचारहेतुषु।***

***प्रथितत्त्वे च सन्नादावधीनज्ञानयोरपि' इति विश्व:।। इत्यमर:***

***प्रत्यय: (पु.) (प्रति+इ+अच्) निश्चित विश्वास, श्रद्धा, विचार भाव, जानकारी, कारण, कीर्ति, सुप् व तिङ् आदि प्रत्यय, शपथ, प्रचलन, छद्र, विवेक (परिजात कोश) पं. ईश्वर चन्द्र (सम्पादक)***[14]

प्रत्यय: - (पु.) (प्रति+इ+अच्) धारणा, निश्चितविश्वास, मूढ: (पु.) परप्रत्ययरानेयबुद्धि: सञ्जात-प्रत्यय: (पंचतन्त्र), विश्वास, भरोसा, श्रद्धा, विश्रंभ, सम्बोध, विचार, भाव, सम्मति, यकीन, निश्चयता, जानकारी, अनुभव, संज्ञान, 'स्थान की दृष्टि से अन्दाजा लगाना, आकृति प्रत्ययात् (मालवि), कारण, आधार, क्रिया का साधन, प्रसिद्धि, यश, कीर्ति, सुप्, तिङ् आदि प्रत्यय जो शब्द व धातुओं के आगे लगते हैं, कृदन्त व तद्धित के प्रत्यय, शपथ, पराश्रमी, प्रचलन, अभ्यास, छिद्र, बुद्धि, समझ ***(वामन शिवराम आप्टे संस्कृत-हिन्दी कोष)।***[15]

इत्येवं प्रकारेण विविधकोषग्रन्थेषु प्रत्ययशब्दस्य नैका: अर्था: ***प्रदर्शितास्सन्ति तेषु सुमिङादिप्रत्ययात्मक: अर्थ: अत्राभीष्ट:।*** उक्तार्थस्वीकृते सति प्रत्ययस्य सामान्यमर्थं शब्दस्य तेन लघुतमेन एककेन भवति, अस्य अर्थ: सर्वदा प्रकृते: अर्थेन सह सम्बन्धो भवति, य: स्वस्य अर्थबोधने स्वतन्त्रो न भवति, स्वस्य अर्थबोधने य: प्रकृते: अपेक्षां करोति, एवञ्च प्रकृते: अन्ते तस्य विधानं भवति। भाषाया: सर्वोत्तमं तथा च सर्वबृहत् खण्डं वयं वाक्यरूपेण जानीम:। वाक्ये शब्दखण्डमपि भवति तदर्थं पदमित्युच्यते। शब्दस्य अथवा प्रातिपदिकस्य वा प्रयोग: तावद् भवितुं नैव अर्हति यावद् तस्मिन् पदत्वं नागच्छेत्। पदनिर्माणार्थं विशेषार्थबोधका: प्रत्यया: प्रयुज्यन्ते। अनेन प्रकारेण एव शब्दा: प्रयोगयोग्या: भवन्ति। उक्तञ्च महाभाष्कारेण ***'न केवला प्रकृति: प्रयोक्तव्या, नापि प्रत्यय:, अपदं न प्रयुञ्जीत।'***[16] इति व्युत्पन्नप्रातिपदिकविधातुं द्विप्रकारकौ प्रत्ययौ प्रयुज्येते। कृत्तद्धितश्च। धातो: कृत्प्रत्ययकृते सति कृदन्तशब्दा: अथवा प्रातिपदिका: भवन्ति, यथा- रम + घञ् = 'राम:'। प्रातिपदिकात् विविधार्थे तद्धितप्रत्यया: भवन्ति, यथा- अर्थ + इक = आर्थिक:।

नैयायिकमूर्धन्य: जगदीशतर्कालंकार: 'शब्दशक्तिप्रकाशिकायाम्' प्रत्ययस्य स्वरूपविभागयो: विषये अनिरूपयत् -

***'यादृशार्थे प्रकृत्यन्यो निपातान्यश्च वृत्तिमान्।***
***स तादृशार्थे शब्द: स्यात् प्रत्ययोऽसौ चतुर्विध:।।'***[17]

अर्थात् - प्रकृतिनिपाताभ्यां भिन्नार्थबोधकं शाब्दिकैककमेव प्रत्यय: यश्च सुप्तिङ्कृत्तद्धितभेदेन चतुर्धा भवति।

## वैयाकरणाभिमते प्रत्ययस्य सामान्यलक्षणम् -

***'प्रकृतिमवधि: मत्त्वा यस्य विधानं सञ्जायते।***
***स: सार्थकशब्दविशेष: प्रत्यय: कथ्यते।'***[18]

'प्रत्यय:' सूत्रस्यास्य व्याख्याने प्रत्यय: इति सार्थकमेककं घोषयन् भाष्यकार: अलिखत् ***'स्वीयम् अर्थम् प्रत्याययतीति'***[19]

भगवता पाणिनिना 'टि' 'घु' 'भ' आदय: लघु संज्ञा: विहिता: परन्तु 'प्रत्यय:' इति अन्वर्थमहासंज्ञा विधानमेव प्रत्ययस्य सार्थकताया: प्रमाणं वर्तते। आचार्यभर्तृहरे: सिद्धान्तानुसारेण यद्यपि पारमार्थिकं सार्थकैककं वाक्यस्फोटत्त्वेन स्वीकृत्तथापि व्यवहार-निवर्तकत्वात् प्रकृतिप्रत्यययो: विभागं तयो: अर्थविभागञ्च महत्त्वपूर्णं वर्तते। भट्टोजिदीक्षितेनापि ***'प्रतीयते विधीयते इति***

---

13 अमरकोशः 3-3-656/657
14 पारिजातकोशः पृ.498
15 संस्कृत-हिन्दी कोशः (वामन शिवराम आप्टे) पृ. 668
16 महाभाष्यम् – 1/2/64
17 शब्दशक्तिप्रकाशिका - 9
18 संस्कृत के प्रत्ययों का भाषाशास्त्रीय पर्यालोचन पृ. 58
19 महाभाष्यम् 3/1/1

**प्रत्ययः'**[20] अनया उक्त्या विधीयमानस्यैव प्रत्ययत्वं स्वीकृतम् । कातन्त्रवृत्तौ ***'प्रतीयते येनार्थः स प्रत्ययः'*** अनेन अर्थमूलकेन कथनेन प्रत्ययस्य परिभाषा उक्ता ।
सारस्वतव्याकरणे ***'कार्यायेत्'***[21] सूत्रस्यास्य व्याख्याने नवलकिशोरशास्त्रीवर्याः स्वमनोरमाटीकायां प्रकृतिप्रत्यययोः सन्दर्भे अलिखत् यत् ***'प्रत्ययः परस्यबोधः , तदादि कारणम् उत्तमवृद्धवाक्यप्रयोगः, तदतिरिक्तः इति'*** अर्थात् अन्येषामर्थज्ञापने यः सक्षमः तथा यस्य संयोगेन पदं वाक्ये प्रयोगार्हं भवति । स प्रत्ययः इति तमतिरिच्य प्रत्ययस्य पूर्वे स्थितव्यवहारे अप्रयोगार्हा शब्दशक्तिः प्रकृति इत्यवधीयते ।
अयमेवार्थः प्रसादटीकायां वासुदेवभट्टेन प्रदर्शितः तद्यथा ***'प्रत्ययः प्रतीतिः प्रयोज्यवृद्धिः बोधः, तस्यादि प्रयोजकवृद्धप्रयोगः, तद्रहितः व्यवहारावस्थायामवर्त्तमानः'।*** इति।
**शब्दप्रजननम् एवं स्तरीयशब्दनिर्माणम्** - भाषाविज्ञानस्य दृष्ट्या प्रत्येकं पदस्य विशिष्टतत्त्वद्वयं भवति 1. अर्थतत्त्वम् 2. सम्बन्धतत्त्वञ्च । येन मानसिकभावानामभिव्यक्तिः भवति, तद् अर्थत्त्वमित्युच्यते यथा- कृ + ण्वुल् = कारक 'करने वाला' । अत्र प्रत्ययेनैव कर्तृत्वमित्यर्थरूपमर्थतत्त्वमायाति।
सम्बन्धतत्त्वं तानि तत्त्वानि कथ्यन्ते यानि उक्तप्रकारस्य व्यक्तभावेषु परस्पर-सम्बन्धस्य अभिव्यक्तिं कुर्वन्ति। यथा- 'कारकः' इत्यस्मिन् 'ण्वुल्' प्रत्ययः सु विभक्तिः।
सम्बन्धतत्त्वेन नूतनातिनूतनानां शब्दानां प्रजननप्रक्रिया भवति यथा- कारकः, पाचकः, पाठकः इत्यादयः अनन्तानन्ताः सार्थकाः शब्दाः उत्पद्यन्तो। अर्थतत्त्वेन शब्देषु भेदमुत्पद्यते यथा- कृ-ण्वुल् = कारकः, कृ-ण्यत् = कार्यम् एकत्र ण्वुल् प्रत्ययेन कारकः, पाठकः, पाचकः, वाचकः, इत्यादयः शब्दाः उत्पद्यन्तो। अन्यत्र च ण्यत् प्रत्ययेन कार्यम्, हार्यम्, धार्यम्, इत्यादयः एकस्तरीयाः शब्दाः उत्पद्यन्तो। अतः शब्दानाम् अर्थदृष्ट्या एकस्तरीयकरणाय प्रत्ययाः साधनत्वेन उपयुज्यन्ते।
प्रत्ययानां विवेचने तेषां शब्दप्रजननक्षमतायाः तथा च शब्दस्तरीयकरणक्षमतायाः अध्ययनं नितरामावश्यकम्। प्रत्ययानां योगे जायमानानां लोपागमवर्णविकारादीनामध्ययनमपि आवश्यकमेव, एकस्य प्रत्ययस्य अनेकार्थे प्रयोगः, अनेकानां प्रत्ययानामेकार्थे प्रयोगः, प्रत्ययस्य प्रयोग- वैविध्यमभिलक्षते।
निष्कर्षानुसारम् इदं प्रत्ययस्य लक्षणं फलति यत् 'तदर्थान्वितस्वार्थबोधने तदपेक्षत्वे सति तत्परावधिकत्वेन विधीयमानत्वम्, तत् प्रत्ययत्वम् इति।' अर्थात् प्रकृत्यर्थेन अन्वितं 'स्व' अर्थबोधने प्रकृतिम् अपेक्षमाणः प्रकृतिम् अवधिं मत्वा यस्य विधानम् अन्ते भवति तद् शाब्दिकं एककं प्रत्ययः इत्युच्यते।
उपर्युक्तेन विवेचनेन इदं स्पष्टं यत्-

१. प्रत्ययस्यार्थः सर्वदा प्रकृतेः अर्थेन सह सम्बद्धो भवति ।
२. प्रत्ययः स्वस्य अर्थबोधने स्वतन्त्रमेककं नास्ति ।
३. स्वार्थज्ञापने असमर्थत्वात् पृथग् प्रयोगार्होऽपि नास्ति ।
४. प्रत्ययः अर्थबोधने प्रकृतेः अपेक्षां करोति ।
५. प्रत्येकस्मिन् शब्दे प्रत्ययस्य शारीरिकी सत्ता स्पष्टरूपेण न दृश्यते ।
६. प्रत्ययः खलु मूलशब्दमप्रभावयन्प्रभावयञ्च स्वाभिव्यक्तौ समर्थो भवति ।
७. शब्देन संयुज्य प्रत्ययः अर्थतत्त्वे परिवर्तनं परिवर्धनं वा अवश्यं करोति ।

## प्रत्ययभेदाः

इत्थं प्रतियन्त्यनेनेति करणव्युत्पत्या प्रत्ययतीति कर्तृव्युत्पत्या, प्रत्याय्यते इति कर्मव्युत्पत्या च तत्तदर्थप्रत्यायकाः प्रत्ययाः'विभक्तिः' 'धात्वंशः' 'तद्धितः' 'कृतः' 'टाबादिभेदेन पञ्चभागेषु विभज्यन्ते ।

उक्तञ्च ***'विभक्तिश्चैव धात्वंशस्तद्धितः कृदितिक्रमात्।***
***चतुर्थ प्रत्ययः प्रोक्तः टाबादिभिः पञ्चधाऽथवा।।'***[22]

प्रकृताध्ययने कृत्तद्धितस्त्रीप्रत्ययानामनुशीलनपूर्वकमध्ययनं क्रियते अतः यथाक्रममादौ कृत्प्रत्ययस्य समीक्षणमत्र क्रियते तदनु तद्धितप्रत्ययानां स्त्रीप्रत्ययानाञ्च समीक्षणमिह करिष्यते।

## कृत्प्रत्ययसमीक्षणम्

---
[20] वै.सि.कौ. संज्ञाप्रकरणम्, सू.सं. 14
[21] सारस्वतप्रक्रिया पृ. 20
[22] शब्दशक्तिप्रकाशिका, धातुप्रकरणम्, 60 पृ. 283

तृतीयेऽध्याये ***'धातो:'*** इति अधिकारसूत्रात् कृत्प्रत्ययानामारम्भो विहितो वर्तते। कृत्प्रत्ययस्य प्रामुख्येन द्विविभागौ वर्तेते, प्रथमं कृत्प्रत्यया: द्वितीयञ्च कृत्यप्रत्ययाश्च। कृत्यप्रकरणस्य समाप्ति: ***'चित्याग्निचित्ये'*** इति सूत्रपर्यन्तं भवति। तदनन्तरं ***'ण्वुल्तृचौ'*** इति सूत्रात् नामविशेषणनिष्पादकस्य कृत्प्रत्ययस्यारम्भ: भवति।

अत्र पूर्वं तावत् कृत्यप्रत्ययसमीक्षणं विधीयते-

## *कृत्यप्रत्ययसमीक्षणम्*

पाणिनीयाष्टाध्याय्यां ***'कृत्या:'*** इति सूत्रेण सूत्रकार: कृत्यसंज्ञाया: विधानमकरोत्। अयमधिकार: ***'चित्याग्निचित्ये च'*** इति सूत्रपर्यन्तं सूत्रै: विहितप्रत्ययानभिलक्ष्य विहितो अस्ति। अत: इदं सूत्रं संज्ञाधिकारसूत्राणां श्रेण्यामुपस्थापितं वर्तते। भाष्यकारेणापि कृत्यपदेन सह संज्ञा इति पदस्य प्रयोगं कृत्वा इदं सूचितं यत् कृत्येति एका संज्ञा इति।

***'कृ त्यसंज्ञायां प्राङ्ण्वुल् वचनम्'*** । अष्टाध्याय्यामपि संज्ञाया: अस्या: अनेकानि प्रयोगस्थलानि नामोल्लेखपुरस्सरमुपलब्धानि सन्ति यथा - ***'कृत्यल्युटो बहुलम्' 'कृत्यतुल्याख्या अजात्या' 'कृत्यैरधिकार्थवचने' 'कृत्यैर्ऋणे' तथा च कृत्यानां कर्तरि*** वा इत्यादीनि। एतेषु सूत्रेषु कृत्यपदेन बोधिता: तव्यत् आदय: सर्वेऽपि सप्त प्रत्यया: समुपस्थिता: भवन्ति।

कृत्यसंज्ञायां प्रविष्टास्सप्तप्रत्यया: सन्ति ते - तव्यत्, तव्य, अनीयर, केलिमर, यत्, क्यप् तथा च ण्यत् इत्यादय:। एतेषु केलिमर् प्रत्यय: वार्तिकेन विहित: तथा च अवशिष्टा: षड्प्रत्यया: सूत्रकारेण पठिता:। ***तव्यत्तव्यानीयर:*** इत्यस्मिन् सूत्रे त्रय: प्रत्यया: तथा च अवशिष्टानां प्रत्ययानां पृथग्पृथग्सूत्रै: विधानं कृतम् ।

## कृत्प्रत्ययसमीक्षणम्

***'ण्वुल्तृचौ'*** इति पाणिनिसूत्रात् नामविशेषणनिष्पादकस्य कृत्प्रत्ययस्यारम्भो भवति । कृत्प्रत्यया: अपि पूर्वकृत् एवम् उत्तरकृत् भेदेन द्विधा विभक्तास्सन्ति। पूर्वकृत्प्रत्ययप्रकरणं तावत् ***'ण्वुल्तृचौ'*** सूत्रात् ***'मतिबुद्धिपूजार्थेभ्यश्च'*** सूत्रपर्यन्तं मन्यते। पूर्वकृत्प्रत्ययप्रकरणे ण्वुल्तृचादि प्रत्यया: कालानुसारेण विभक्ता: भवन्ति । प्रत्ययानां कालनुसारेण विभागेऽपि एकं विशिष्टक्रममस्ति। आदौ तावत् सार्वकालिक प्रत्यया: तदनु भूतकालिकप्रत्यया: एवं तत्पश्चात् वर्तमानकालिकप्रत्यया: विभक्ता: वर्तन्ते।

कृत्प्रत्ययानां संख्याधिक्यात् अनेके प्रत्यया: विभिन्नार्थेषु प्रयुक्तत्वात् पृथग्पृथग् अवान्तरप्रकरणेषु नैकवारं विहिता: भवन्ति। एकस्मिन् एव अर्थे बहव: प्रत्यया: तथा च अनेके प्रत्यया: कुत्रचित् एकस्मिन् एवार्थे प्रयुक्ता: भवन्ति। अत: नास्ति समेषां प्रत्ययानामध्ययनं सम्भवमिह इति धिया प्रकृताध्ययने लोकव्यवहारदृष्ट्या, पाठ्यक्रम-दृष्ट्या च अत्र प्रमुखा: प्रत्यया: एव स्वीकृतास्सन्ति ।

## तद्धितप्रत्ययसमीक्षणम्

'तद्धित' इति शब्दस्यास्य सर्वनाम 'तत्' तथा 'हितं' इत्यनयो: शब्दयो: समासत्वात् हितशब्दस्य योगे चतुर्थी विभक्ते: प्रयोगत्वात् च 'तस्मै, ताभ्यां, तेभ्यो वा हितो हिता वा तद्धिता:' इदं विग्रहवाक्यं भवति। तेभ्यो लौकिकवैदिकेभ्यो हितास्तद्धिता: 'तत्' इति पदेन समस्तसुबन्तादीनि पदानि संकेतितानि भवन्ति। तेभ्य: हितमिति इति कथनेन अयमाशय: यत् तेषाम् अर्थात् समाससुबन्तादीनां स्थाने अभावे वा तै: प्रतिपाद्यमानार्थस्य बोधकत्वात् एते प्रत्यया: तद्धित इति शब्देन व्यवह्रयन्ते । भाषायामेतेषां प्रत्ययानां प्रयोग: एच्छिकं वैकल्पिकञ्च भवति । विभक्त्यन्तपदेभ्य: विधीयमानानां प्रत्ययानां 'तद्धित' इति संज्ञा शाब्दिकै: विहिता अस्ति । संज्ञाया: अस्या: प्रयोग: पाणिनिमतिरिच्य हेमचन्द्रशर्ववर्माधर्मकीर्तिप्रभृतय: अपि कृतवन्त: ।

व्याकरणशास्त्रे परार्थाभिधानं वृत्ति: इत्युक्तम् । कृत्, तद्धित:, समास:, एकशेष: तथा च सनाद्यन्त: इति पञ्चवृत्तय:, तेषु तद्धित: सर्वाधिकं व्यापकं विस्तृतञ्च वर्तते । 'तद्धित' एका अन्वर्थकसंज्ञा वर्तते । अष्टाध्याय्या: चतुर्थाध्यायस्य ***'तद्धिता:'*** सूत्रादारभ्य पञ्चमाध्यायस्य ***'निष्प्रवाणिश्च'*** इत्यन्तिमसूत्रपर्यन्तं तद्धिताधिकारो वर्तते । आचार्यपाणिने: तद्धितप्रकरणे प्रायश: ११०९ सूत्राणि सन्ति । तद्धितप्रत्यया: विभिन्नान् अर्थान् व्यक्तं कुर्वन्ति । यद्यपि तद्धितप्रत्ययानां क्षेत्रमत्यन्तं सूक्ष्ममेवं भेदोपभेदेन सम्पूरितमस्ति तथापि विंशति: प्राया: तद्धितप्रत्यया: अष्टाध्याय्यां वर्णितास्सन्ति ते च-यथा

१. स्त्रीविषयकप्रत्यया: (४/१/७७ त: ४/१/८१ पर्यन्तम्)
२. अपत्यादिविकारान्तार्थसाधारणप्रत्यया: (४/१/८२ त: ४/१/८६)
३. अपत्यार्थकप्रत्यया: (४/१/८७ त: ४/१/१७६)
४. रक्ताद्यर्थकप्रत्यया: (४/२/१ त: ४/२/६५)
५. चातुरर्थिकप्रत्यया: (४/२/६६ त: ४/२/९०)
६. शैषिकप्रत्यया: (४/२/९१ त: ४/३/१३१)

७. विकारार्थकप्रत्यया: (४/३/१३२ त: ४/३/१६६)
८. प्राग्वहतीयप्रत्यया: (४/४/१ त: ४/४/७४)
९. प्राग्घितीयप्रत्यया: (४/४/७५ त: ४/४/१४४)
१०. छयद्विधिप्रत्यया: (५/१/१ त: ४/१/१७)
११. आर्हीयप्रत्यया: (५/१/१८ त: ४/१/७०)
१२. ठञधिकारस्य कालाधिकारप्रत्यया: (४/४/७१ त: ५/१/९५)
१३. ठञ्विधिप्रत्यया: (५/१/९६ त: ५/१/११३)
१४. भावकर्मार्थप्रत्यया: (५/१/११४ त: ५/१/१३५)
१५. पाञ्चमिकप्रत्यया: (५/२/१ त: ५/२/४४)
१६. मत्वर्थीयप्रत्यया: (५/२/४५ त: ५/२/१४०)
१७. प्राग्दिशीयप्रत्यया: (५/३/१ त: ५/३/२६)
१८. प्रागिवीयप्रत्यया: (५/३/२७ त: ५/३/९५)
१९. स्वार्थिकप्रत्यया: (५/३/९६ त: ५/४/६७)
२०. समासान्तप्रत्यया: (५/४/६८ त: ५/४/१६०)

यद्यपि आचार्येण पाणिनिना अष्टाध्याय्यां क्वचिदपि तद्धितप्रत्ययानां वर्गीकरणस्य संकेत: न संकेतित: तथापि अधीतपाणिनीयतन्त्राचार्यै: तद्धितप्रत्ययानां अर्थाधारितं वर्गीकरणं प्रदर्शितम् अस्वार्थिकम्, स्वार्थिकम्, अत्यन्तस्वार्थिकञ्च।

## स्त्रीप्रत्ययसमीक्षणम्

***'स्त्रियाम्'*** इति सूत्राधिकारे टाबादिपदेन विहिता: प्रत्यया: स्त्रीप्रत्ययत्वेन गृह्यन्ते । ***'अजाद्यतष्टाप्' 84*** इति सूत्रस्थ व्याख्याने अजादीनामकारान्तस्य च वाच्यं यत् स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्' इत्यनेन कथनेन स्पष्टरूपेण निर्दिष्टं स्त्रीत्वम् अजादीनामकारान्तस्य प्रातिपदिकस्य च वाच्यं भवति टाप् तु तद् द्योतकमेव भवतीति। अनेन तत्र द्योत्ये टाप् कथनस्य अर्थं फलति। द्योतकत्वं तावत् स्वसमभिव्याहृत्य शब्दनिष्ठशक्त्युद्बोधकत्वरूपमिति अर्थात् यथा गृहे घटादय: पदार्था: पूर्ववत् एव भवन्ति किन्तु सति दीपे ते द्योतन्ते। तथैव प्रातिपदिकस्य स्वार्थ-द्रव्य-लिङ्ग-संख्यादय: अर्था: पूर्ववत् एव भवन्ति। स्त्रीप्रत्ययास्तु तं स्त्रीत्वरूपं प्रातिपदिकार्थं द्योतयन्ति । उक्तञ्च नागेशेन - लिङ्गमपि नामार्थ: । प्रत्ययानां द्योतकत्वात् । अन्यथा वागुपानहादि शब्देभ्य: 'इयं तव वागिति स्त्रीत्वबोधनापत्ते: इत्यादि । अतएव 'अजा' इत्यत्र स्त्रीत्वविशिष्टा 'अजा' इति बोधो जायते ।

## प्रकृताध्ययनस्यावश्यकता महत्त्वञ्च

प्रयोजनमनुदिश्य न मन्दोऽपि प्रवर्तते इति कथने अनावश्यकं प्रयोजनहीनं तथा च सामाजिकमहत्त्वहीनं कार्यमकार्यमेव उच्यते । कृत्पूर्वविवेचनेन इदं स्पष्टं यत् जगदिदमत्याधुनिकशिक्षाया: वर्तते, एवञ्चाभासी शिक्षा सम्पूर्णे विश्वे व्याप्यमाना दृश्यते। समयेऽस्मिन् आवश्यकं यत् संस्कृतशिक्षायामपि अनुसन्धानपूर्वकं तादृशानां विधीनां पद्धतीनाञ्च विकासो भवेत्, येन संस्कृतशिक्षा अस्मिन् प्राविधिके वैज्ञानिके युगे च स्वास्तित्त्वं संस्थापयितुं समर्था भवेत्। तथा च शिक्षकछात्राभ्यामनुभूयमानानां समस्यानां निराकरणाय पथनिर्माणं भवेत्। अस्मिन् क्षेत्रे बहव: संस्कृतविश्वविद्यालया: अनुसन्धातार: च कार्यं कुर्वन्तस्सन्ति परन्तु विश्वविद्यालयै: विकसितस्य सङ्गणकसहानुदेशनसामग्र्या: अनुसन्धानपूर्वकं मूल्याङ्कनं न विहितम् । प्रकृतानुसन्धाने विकसितस्य प्रत्ययाधारितसङ्गणकसहानुदेशनसामग्र्या: मूल्याङ्कनं विधास्यते इति दृष्ट्या इदम् अनुसन्धानं महत्त्वपूर्णं वर्तते।
प्रत्ययसमीक्षणेन एतदवगम्यते यत् प्रत्ययमाधारीकृत्य विवेचनीया: विषया: नाल्पीयांस: अपितु विशाला: सन्ति। प्रत्ययानां विषये दिङ्मात्रमेवेह प्रदर्शितम्।
सामान्यतया शब्दनिर्माणे प्रकृतिप्रत्ययादीनां महती भूमिका वर्तते। तत्र प्रकृतिप्रत्ययमतिरिच्य शब्दस्य कल्पना नैव कर्तुं शक्यते। प्राय: प्रत्ययस्य प्राधान्यं दृश्यते, प्रत्ययेन प्रयोगयोग्य: शब्दार्थ: उत्पद्यते। विषयस्यास्य अध्ययनम् अध्यापनञ्च आदिकालादेव कृतमस्ति। विषयेऽस्मिन् निरन्तरेण अनुसन्धानादिकमपि प्रचाल्यमानं वर्तते । साम्प्रतिके काले छात्रा: संस्कृतं क्लिष्टतरं कष्टकरञ्चेति मत्वा संस्कृताध्ययनविमुखा: भवन्ति, इत्येदर्थमेव संस्कृते छात्राणां रुचि: समुत्पादनाय, अध्ययनाध्यापनेऽनुभूयमानां क्लिष्टतामपाकर्तुं च अनेके प्रयासा: प्रयोगाश्च प्रचाल्यमानस्सन्ति। कुत्रचित् सन्धिं कुत्रचित् कारकमधिकृत्य अथ च व्याकरणरीत्या अन्यान्यमंशमाधारीकृत्य विविधा: प्रयोगा: क्रियमाणास्सन्ति।

अस्मिन् एव चक्रे एतेषां व्याकरणांशानां सरलरीत्या अध्यापनाय बहूनि रेखीयाभिक्रमाधारितानि शाखीयाभिक्रमाधारितानि च कार्यक्रमाणि प्रकल्पितानि सन्ति।

## शोधोद्देश्यम्

प्रत्येकस्य अपि भूयमानस्य कार्यस्य मूले विशिष्टं प्रयोजनमुद्देश्यं वा तिष्ठति। तमुद्देश्यमनुसरन्नेव कार्यं प्रगतिं प्राप्नोति। शोधकार्यस्योद्देश्येषु स्पष्टता अत्यन्तावश्यकी भवति। अनेन शोधस्यौचित्यं व्यावहारिकताश्च परीक्षितुं शक्यन्ते। अत: अस्य शोधस्य यान्योद्देश्यानि तानि अध: प्रस्तूयन्ते -

१. संस्कृतव्याकरणे प्रत्ययाधारिताया: सङ्गणकसहानुदेशनसामग्र्या:विकासकरणम्।
२. संस्कृतव्याकरणे प्रत्ययाधारिताया: सङ्गणकसहानुदेशनसामग्र्या:परीक्षणम्।
३. संस्कृतव्याकरणे प्रत्ययाधारिताया: सङ्गणकसहानुदेशनसामग्र्या:मूल्याङ्कनम्।
४. संस्कृतव्याकरणे प्रत्ययाधारिताया: सङ्गणकसहानुदेशनसामग्र्या: छात्राणामभिवृत्तौ प्रभावस्याध्ययनम्।
५. संस्कृतव्याकरणे प्रत्ययाधारिताया: सङ्गणकसहानुदेशनसामग्र्या: प्रयोगेण छात्रोपलब्धौ प्रभावस्यान्वेषणम्।

समाजोपकारकं सार्थकञ्च परिणामात्कानुसन्धानमेव वास्तविकानुसन्धानमित्युच्यते। तच्च अनुसन्धानमुद्देश्यानां सम्प्राप्तिना संसिद्धयति । अनुसन्धानेन प्राप्तनिष्कर्षा: समस्याया: उचितसमाधाने नूतनानां सिद्धान्तानां प्रतिपादने च समर्था: भवन्ति । कृतानुसन्धानस्य सारांशपूर्वकं प्राप्तनिष्कर्षाणां समुचितव्याख्या प्रस्तोतुं प्रयासो अत्र विधीयते ।

संस्कृतव्याकरणं संस्कृतभाषाया: प्रमुखमङ्गमिति । भ्रान्त्या समुचितानां शिक्षणविधीनामभावेन वा इदं कठिनं नीरसञ्चेत्यनुभूयते छात्रै: । सङ्गणकसहानुदेशनेन क्लिष्टतमोऽपि विषय: सारल्येन छात्रै: स्वयमेवाधिगन्तुं शक्यते विषयश्च सरसो जायते इति ख्यातिमाधृत्यैव प्रत्ययेति व्याकरणस्य महत्त्वपूर्णमंशं स्वीकृत्य ***'छात्राभिवृत्त्युपलब्ध्यो: सन्दर्भे संस्कृतप्रत्ययाधारित-सङ्गणकसहानुदेशनसामग्र्या: विकास: मूल्याङ्कनञ्च'*** इति विषय: स्वीकृत:।

## परिकल्पना:

1. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययाभिवृत्ति - सम्बद्धप्राक्पश्च- परीक्षणयो: सार्थकमन्तरं नैव विद्यते ।
2. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धि -सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते ।

## परिकल्पनयो: उपशून्यपरिकल्पना:

1. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणाम् आत्मसम्प्रत्यय-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते ।
2. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणाम् उपयोगिता-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
3. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणाम् अभिक्षमता-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
4. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां काठिन्य-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
5. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रत्ययानां सामान्यज्ञान-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
6. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रकृतिप्रत्ययो: ज्ञानसम्बद्ध-प्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
7. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रत्ययुक्तशब्दार्थज्ञान-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
8. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रत्ययै: पदनिर्माणज्ञान-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।

9. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रत्ययानां प्रयोगज्ञान-सम्बद्धप्राक्पश्च-परीक्षणयो: सार्थकमन्तरं नैव विद्यते।
10. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां प्रत्ययनियमानां ज्ञानसम्बद्ध प्राक्पश्चपरीक्षणयो: सार्थकमन्तरं नैव विद्यते।

अनुसन्धानमिदं प्रयोगात्मकं विकासात्मकञ्च वर्तते । अनुसन्धानक्षेत्रे प्रयोगात्मकानुसन्धानं प्रसिद्धं विकासात्मकानुसन्धानस्य चिन्तनं प्राविधिकक्षेत्रे अधिकतया क्रियते अत्र द्वयोरपि वर्णनं विहितं तच्च संक्षेपेणात्र प्रस्तूयते-

## प्रयोगात्मकानुसन्धानविधि:

प्रयोगात्मकानुसन्धानविधि: अनुसन्धानविधिषु सर्वाधिकमनोवैज्ञानिक: परिष्कृतश्च विधिरस्ति। विधिरयं भविष्योन्मुखी भवति। प्रयोगात्मकानुसन्धाने स्वतन्त्राश्रितचरयो: कारणपरिणामसम्बन्ध: प्रयोगकर्त्रा निश्चयेन संस्थाप्यते ।

प्रयोगात्मकानुसन्धानविधे: मूलाधार: स्वतन्त्रचरे परिवर्तनस्य आश्रितचरे जायमानस्य प्रभावस्याध्ययनमस्ति । अनुसन्धानेऽस्मिन् प्रयोगविधिना प्रत्ययाधारित - सङ्गणक -सहानुदेशनस्य प्रभावो छात्राणां प्रत्ययाभिवृत्तौ उपलब्धौ च परीक्षितं तेन च निर्मितस्य सङ्गणकसहानुदेशनाभिक्रमस्य मूल्याङ्कनं कृतम् । अत: अनुसन्धानस्य प्रकृत्यानुगुणं प्रयोगात्मकविधे: प्रयोग: अनुसन्धानेऽस्मिन् कृत:।

## विकासात्मकानुसन्धानम्

कस्यचिदपि पदार्थस्य, यन्त्रस्य, पाठ्यपुस्तकस्य, अभिक्रमस्य चेत्यादीनाम् अनुसन्धानपूर्वकं विकास: निर्माणं वा यस्मिन् अनुसन्धाने क्रियते तच्च विकासात्मकानुसन्धानं भवति । प्रकृतानुसन्धाने अनुसन्धात्रा संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनसामग्र्या: विकास: कृत: इत्येतदर्थम् अत्र विकासात्मकानुसन्धानविधेरपि प्रयोगो विहित:।

अनुसन्धानविधे: वर्णनानन्तरम् अनुसन्धानाभिकल्परूपेण अनुसन्धानेऽस्मिन् प्रयोगात्मकानुसन्धानाभिकल्पस्य प्रयोगो विहित: प्रयोगात्मकशोधाभिकल्पेन तात्पर्यं कस्मैश्चित् प्रयोगात्मकानुसन्धानाय सम्पाद्यमानस्य प्रयोगस्य विस्तृतयोजनया वर्तते। अथवा प्रयोगसमये स्वतन्त्राश्रितचरयो: मध्ये वस्तुनिष्ठरीत्या कार्यकारणसम्बन्धं स्थापयितुं, निष्कर्षाणां प्राप्तये, परिकल्पनानां परीक्षणार्थञ्च प्रयुञ्जानानां कार्यविधीनां विस्तृता अथवा प्रस्तावितरूपरेखा एव प्रयोगात्मकाभिकल्प: कथ्यते । तत्रापि प्रकृतानुसन्धाने एकलसमूहप्राक्पश्चपरीक्षणाभिकल्पस्य प्रयोग: कृत: अभिकल्पेऽस्मिन् स्वतन्त्रचरस्यानुप्रयोगात् प्रागेव आश्रितचरस्य मापनं क्रियते तदनु स्वतन्त्रचरस्यानुप्रयोग: क्रियते। ततस्तत: पुन: आश्रितचरस्य मापनं क्रियते। अन्ते च आश्रितचरस्य मापान्तरं ज्ञायते। आश्रितचरस्य माने परिवर्तनस्य कारणं स्वतन्त्रचरस्यानुप्रयोग: एवास्तीति सिद्धयति।

प्रकृतानुसन्धानस्य जनसंख्याया: न्यादर्शस्य च निरूपणं निम्नरूपेण वर्तते-

| | | | |
|---|---|---|---|
| (क) | वर्ण्यविषय: | - | उच्चमाध्यमिकस्तरीया: सर्वेऽपि छात्रा:। |
| (ख) | अन्विति: | - | उच्चमाध्यमिकस्तरस्य एकादश द्वादशी कक्षाया: सर्वे छात्रा:। |
| (ग) | प्रसारक्षेत्रम् | - | मध्यप्रदेशस्थसंस्कृतपाठशाला: विद्यालया: महाविद्यालयाश्च। |
| (घ) | समय: | - | सत्रम् (2014-15) |

अनेन प्रकारेण अनुसन्धानस्यास्य जनसंख्या इत्थं निर्धारिता यत्- 2014-15 सत्रस्य मध्यप्रदेशस्य उच्चमाध्यमिकस्तरीया: एकादश-द्वादशकक्षाया: सर्वे छात्रा: अनुसन्धानेऽस्मिन् जनसंख्यात्वेन स्वीकृता: इति ।

अनुसन्धानेऽस्मिन् साधारणयादृच्छिकन्यादर्शविधिना मध्यप्रदेशसर्वकारेण सञ्चाल्यमानेषु संस्कृतमहाविद्यालयेषु भोपालस्थ रामानन्दसंस्कृतमहाविद्यालयस्य, भोपालनगरे एव केन्द्रसर्वकारेण सञ्चाल्यमानस्य राष्ट्रियसंस्कृतसंस्थानस्य, भोपालनगरस्य कात्यायनी शक्तिपीठसंस्कृतपाठशालाया:, सीहोरमण्डलस्थ सलकनपुरे सञ्चाल्यमानस्य श्री देवी जी संस्कृत उ. विद्यालयस्य तथा होशंगाबादमण्डलस्थ आर्य गुरुकुलमहाविद्यालयस्य उच्चमाध्यमिकस्तरीया: छात्रा: न्यादर्शत्वेन स्वीकृता:।

छात्राणां संस्कृतप्रत्ययाभिवृत्त्युपलब्ध्यो: परीक्षणार्थमुपकरणत्वेन शोधकर्त्रा संस्कृतप्रत्ययाभिवृत्तिपरीक्षणं, संस्कृतप्रत्ययोलब्धिपरीक्षणं चेति द्वे परीक्षणे निर्मिते तत्र आत्मसम्प्रत्यय:, उपयोगिता, अभिक्षमता, काठिन्यमिति संस्कृतप्रत्ययाभिवृत्त्पिरीक्षणस्य चत्वार: आयामा: निर्धारिता: तथा प्रत्यानां सामान्यज्ञानम्, प्रकृतिप्रत्ययो: ज्ञानम्, प्रत्यययुक्तशब्दार्थज्ञानम्, प्रत्ययै: पदनिर्माणज्ञानम्, प्रत्ययानां वाक्यप्रयोगज्ञानम्, प्रत्ययनियमानां ज्ञानमिति संस्कृतप्रत्ययोपलब्धिपरीक्षणस्य षडायामा: निर्धारिता:, तेषां विस्तारेण वर्णनमपि अध्यायेऽस्मिन् कृतम् । शोधकर्त्रा

निर्मिताभ्यामुपकरणाभ्यां प्राप्तानां मात्रात्मकप्रदत्तानां विशेषणार्थं मध्यमानम्, मानकविचलनम्, टी-परीक्षणमिति सांख्यिकीयविधीनां प्रयोग: कृत: ततस्तावद् अनुसन्धानेऽस्मिन् निर्मितस्य संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनस्य निर्माणप्रक्रिया वर्णिता। अनुदेशनस्य त्रुटिदरं सूचनाघनत्वञ्चापि अध्ययेऽस्मिन् ज्ञातमिति।

## अध्ययनात् प्राप्ततथ्यानि शोधनिष्कर्षा: च

**छात्राभिवृत्त्युपलब्ध्यो: सन्दर्भे संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनसामग्र्या: विकास: मूल्याङ्कनञ्चेति** अनुसन्धाने प्राप्तप्रदत्तानां सांख्यिकीयविश्लेषणेन प्राप्ततथ्यानामाधारेण शोधनिष्कर्षा: इत्थं सम्प्राप्ता:

१. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययाभिवृत्तौ स्वीकारात्मकं परिवर्तनं भवति।
२. छात्राणां संस्कृतप्रत्ययाभिवृत्ते: आत्मसम्प्रत्ययेत्ययामे संस्कृतप्रत्ययाधारित-सङ्गणक-सहानुदेशनेन स्वीकारात्मक: प्रभावो जायते।
३. छात्राणां संस्कृतप्रत्ययाभिवृत्ते: 'उपयोगिता' इत्यायामे संस्कृतप्रत्ययाधारित-सङ्गणक-सहानुदेशनेनस्य स्वीकारात्मक: प्रभावो भवति।
४. छात्राणां संस्कृतप्रत्ययाभिवृत्ते: 'अभिक्षमता' इत्यायामे संस्कृतप्रत्ययाधारित-सङ्गणक-सहानुदेशनेनस्य स्वीकारात्मक: प्रभावो भवति।
५. छात्राणां संस्कृतप्रत्ययाभिवृत्ते: 'काठिन्यमित्यायामे संस्कृतप्रत्ययाधारित-सङ्गणक-सहानुदेशनेनस्य स्वीकारात्मक: प्रभावो भवति।
६. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धौ स्वीकारात्मकाभिवृद्धि: भवतीति ।
७. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: प्रत्ययानां सामान्यज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: भवतीति।
८. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: 'प्रत्ययानां प्रकृतिप्रत्ययो: ज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: जायते।
९. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: प्रत्यययुक्तशब्दार्थज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: भवतीति।
१०. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: प्रत्ययै: पदनिर्माणज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: जायते।
११. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: प्रत्ययानां वाक्ये प्रयोगज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: भवतीति।
१२. संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनेन छात्राणां संस्कृतप्रत्ययोपलब्धे: प्रत्ययनियमानां ज्ञानमित्यायामे स्वीकारात्मकाभिवृद्धि: भवतीति।

## सामान्यीकरणार्थं शैक्षिकनिहितार्थ:

आधुनिकं जगदिदमत्याधुनिकं जायमानं वर्तते। चिकित्सा, संचार-व्यवस्था, संसाधनानि, जीवनशैली सर्वत्रापि द्रुतगत्या परिवर्तनमस्याभि: दृष्टुं शक्यते। शिक्षायामपि तत् परिवर्तनं E- शिक्षाया: अथवा आभासिकशिक्षाया: स्वरुपे अस्माभिरनुभूतम्। अस्य परिवर्तनस्य दृष्ट्या व्याकरणशिक्षणमधुना गर्भस्थमेवेति वक्तुं शक्यते, व्याकरणस्याध्यापने शिक्षक: साम्प्रतमपि तेषामेव प्राचीनार्वाचीनानां विधीनां प्रयोगाय बद्ध: अस्ति । युगोऽयं अत्याधुनिकशिक्षाया: वर्तते तथा च अत्याधुनिक-शिक्षापद्धत्यामत्याधुनिक-शिक्षणविधय: अध्ययनाध्यापनयो: साधनत्वेनोपयुज्यन्ते । दशायामस्यां व्याकरणशिक्षणे नैका: समस्या: समुद्भूतास्सन्ति । विघटित: पाठ्यक्रम: विषयं प्रति छात्राणामरुचि: । विज्ञानादि-विषयाणामपेक्षया अत्याधुनिकाध्यापन-सहायकोपकरणानामभाव:। सत्यामाधुनिक-शिक्षणयन्त्राणामपि पाठ्यवस्तूनामभाव: छात्राणां न्यूना शैक्षिकोपलब्धि:। एता: व्याकरणशिक्षणे शिक्षकैरनुभूयमानास्समस्या: सन्ति तथैव पाठ्यक्रमस्यावगमने समस्या अध्ययने औदासीन्यम् । अध्ययनाय विविधसामग्रीणामभाव:। सत्यामाधुनिक-शिक्षणयन्त्राणामपि पाठ्यवस्तूनामभाव: । अध्ययने अरूचि: इत्यादय: व्याकरणाध्ययने छात्रैरनुभूयमानास्समस्या: सन्ति । एतासां समस्यानां समाधानाय प्रयासरूपेण अनुसन्धानमिदं विहितम् । अनुसन्धानेऽस्मिन् छात्राणां

संस्कृतप्रत्ययाभिवृत्ति: तथा संस्कृतप्रत्ययोपलब्धि: प्रमुखाश्रितचरौ स्वीकृतौ तथा संस्कृतप्रत्ययाधारित-सङ्गणकसहानुदेशनं स्वतन्त्रचर: निर्धारित: ।

भाषायां व्याकरणस्य महत्त्वपूर्णं स्थानमस्तीति सर्वैरङ्गीक्रियते । व्याकरणेन भाषा शुद्धा स्पष्टा प्रभावशालिनी च जायते । यस्य भाषा प्रभावशालिनी भवति स: सर्वत्र सफलतां प्राप्नोति यतोहि भाषा एव जगति व्यवहारस्य प्रमुखं साधनमिति नास्ति संशयावसर: यथा मानव: समाजस्य कारणमस्ति समाजश्च जगत: कारणमस्ति तथैव शब्द: वाक्यस्य वाक्यञ्च भाषाजगत: कारणमस्ति । भाषा प्रभावकारिणी तदा भवति यदा भाषायां नूतनातिनूतनानां शब्दानां प्रयोग: क्रियते तथा च नूतनानां शब्दानां निर्माणक्षमता प्रत्ययेषु वर्तते। अत: प्रत्ययानां ज्ञानं तेषां स्वभाषायां प्रयोगः च अत्यावश्यकः भवति । परन्तु केवलं ज्ञानं नास्ति पर्याप्तं प्रत्ययानां विषये छात्राणाम् अभिवृत्ति: कीदृशी वर्तते? प्रत्ययानां विषये तेषाम् आत्मसम्प्रत्यय: कीदृश: ? प्रत्ययानामभिक्षमताया: विषये तेषां चिन्तनं किं वर्तते? प्रत्ययानामुपयोगिताया: विषये तेषां चिन्तनं तथा प्रत्ययानामध्ययने काठिन्यमित्यादीनामायामानां विषये अपि छात्राणां स्वीकारात्मकं चिन्तनमपेक्षितं भवति तच्च पारम्परिकविधिना अशक्यमिति । स्वीकारात्मकाभिवृत्तौ सति छात्राणां प्रत्ययसम्बद्धोपलब्धौ अपि वृद्धि: भवति परन्तु सा च उपलब्धि: केवलं परीक्षा दृष्ट्या न भवितव्या तत्रापि संस्कृतप्रत्ययानां सामान्यज्ञानं, प्रकृतिप्रत्ययो: ज्ञानं, प्रत्यययुक्त-शब्दार्थज्ञानं, प्रत्ययै: पदनिर्माणज्ञानं, प्रत्ययानां वाक्ये प्रयोगज्ञानं तथा प्रत्ययनियमानां ज्ञानमिति विशिष्टायामानां स्तरे उत्तमोपलब्धि: अपेक्षिता भवतीत्येवं प्रकारेण कृताध्ययनेन सम्यग्प्रत्ययज्ञानं भवितुमर्हति परन्तु विद्यालयेषु, महाविद्यालयेषु पाठशालासु च अद्यापि व्याकरणशिक्षणे पुरातनविधिरेव उपयुज्यते तेन छात्राणां प्रत्ययानामध्ययनविषये नकारात्मकाभिवृत्तिरुपलब्धिश्चोपजायेते। अस्य कुप्रभावो साक्षात् छात्राणां भाषायां तेषां व्यवहारे तेषामात्मविश्वासे च भवति तेषां सर्वाङ्गीणविकासश्च अवरुद्ध्यते। परोक्षरूपेण तेषां सम्पूर्णं जीवनं प्रभावितं भवति। एतदर्थमेव शिक्षायां महद् परिवर्तनं जायमानं वर्तते। सङ्गणकसहानुदेशनं परिवर्तनस्यास्य प्रधानाङ्गत्वेन स्वीक्रियते। शिक्षाविद्भि: अनुसन्धानपूर्वकमिदं निगदितं यत् सङ्गणकसहानुदेशनेन छात्राणां विषयं प्रति स्वीकारात्मकाभिवृत्तिरूपलब्धिश्चोपजायेते। अनुसन्धानमिदमपि उपरोक्तं सिद्धान्तं परिपुष्टयति। अत: शैक्षिकदृष्ट्या निहितार्थत्वेन वक्तुं शक्यते यत् व्याकरणशिक्षणे विशिष्य प्रत्ययाध्ययने आत्मसम्प्रत्ययस्य, प्रत्ययानामभिक्षमताया: प्रत्ययानामुपयोगिताया: प्रत्ययानामध्ययने काठिन्यमित्यादीनामायामानां विषये छात्राणां स्वीकारात्मकं चिन्तनमपेक्षितं भवति। स्वीकारात्मकाभिवृत्तौ सति छात्राणां प्रत्ययसम्बद्धोपलब्धौ अपि वृद्धि: भविष्यति तत्रापि संस्कृतप्रत्ययानां सामान्यज्ञानं, प्रकृतिप्रत्ययो: ज्ञानं, प्रत्यययुक्तशब्दार्थज्ञानं, प्रत्ययै: पदनिर्माणज्ञानं, प्रत्ययानां वाक्ये प्रयोगज्ञानं तथा प्रत्ययनियमानां ज्ञानमित्यायामेषु समुचिताभिवृद्धि: भविष्यति येन छात्राणां भाषा शुद्धा परिष्कृता प्रभावशालिनी च भविष्यति एवञ्च अध्यापकै: अभिभावकैश्च सङ्गणकसहानुदेशनेन भारोऽपि न्यून: भविष्यति। छात्राश्च स्वगत्या विषयान् पठित्वा विषयं समुचितरूपेणाधिगमिष्यन्ति। तेषां सर्वाङ्गीणविकासस्य मार्गोऽपि प्रशस्त: भविष्यतीति।

**उपयोगितासम्बद्धा: प्रस्तावा:**

शोधप्रबन्धोऽयं तेषां कृते वर्तते ये कथमपि शिक्षणप्रक्रियया सम्बद्धास्सन्ति। अनुसन्धानेऽस्मिन् शोधकर्त्रा सङ्गणकसहानुदेशनेन छात्राणां विषयं प्रति अभिवृत्तौ, छात्राणामुपलब्धौ च जायमानस्य प्रभावस्याध्ययनं विहितम् । विशिष्य अत्र छात्राणां प्रत्ययाभिवृत्त्युपलब्ध्यो: सङ्गणकसहानुदेशनस्य प्रभावो दृष्ट:। अस्मिन् अनुसन्धानेन प्राप्तनिष्कर्षाणामाधारेण विभिन्नेभ्य: वर्गेभ्य: निम्नलिखिता: प्रस्तावा: प्रस्तूयन्ते।

## सङ्गणकसहानुदेशननिर्मातृभ्य: प्रस्तावा:

प्रकृतिमाधृत्य प्रत्येकोऽपि विषय: भिन्न: भवति अत: अनुदेशनस्य निर्माणकाले निर्मातृभ्य: विषयस्य प्रकृति: कीदृशी वर्तते इति चिन्तनमवश्यं करणीयम्। अनन्तरं जनसंख्याया: विस्तृताध्ययनं सामाजिकशैक्षिकार्थिकमनोवैज्ञानिकदृष्ट्या च परमावश्यकं भवति। अनुदेशनस्य निर्माणकाले विषयस्य लघु:-लघु: विभागा: क्रियन्ते अत्र इदमवधेयं यत् प्रत्येकोऽपि विभाग: सार्थक: स्यात् तथा सर्वेषु विभागेषु परस्परं सम्बन्धोऽपि भवेत्। विभाग: तादृश: भवितव्य: येन विषय: सरलो भवेत्। अनुदेशनस्य निर्माणे अधिगमसिद्धान्तानाम् अनुसरणं करणीयम्। उद्दीपनानुक्रिया, व्यवहार:, पुनर्बलनं, पुष्टिकरणं, अनुबोधनं, क्रमागतगति:, निदानोपचार:, छात्रनियन्त्रणमिति प्रमुखानि मूलतत्त्वानि येषामनुपालनमनुदेशने आवश्यं करणीयम्। अनुदेशनं लघ्वाकारकं भवेत्। बृहद् विषयश्चेत् लघुषु अंशेषु पृथग्पृथग् अनुदेशनं निर्मातव्यम्। अनुदेशने स्वगतिसिद्धान्त: अत्यन्तप्रमुख: अत: अनुदेशनस्य निर्माणकाले अस्य सिद्धान्तस्यानुपालनमवश्यं करणीयम्। अनुदेशनस्य निर्माणानन्तरं तस्य मूल्याङ्कनं, त्रुटिदरनिर्धारणं सूचनाघनत्वस्य ज्ञानमवश्यं सम्पादनीयम्। अन्ते च अनुदेशनं छात्रनियन्त्रितं भवेदित्यादय:प्रमुखा: प्रस्तावा: शोधकर्त्रा सङ्गणकसहानुदेशननिर्मातृभ्य: विहिता:।

## अध्यापकेभ्य: प्रस्तावा:

कक्षायामध्यापने अध्यापकै: नैका: समस्या: भवन्ति यथा विषये छात्राणाम् अनवधानमरुचिश्च, विघटित: पाठ्यक्रम:, विषयास्याध्यापने समुचितविधीनां चयनमित्यादय: विशिष्य व्याकरणाध्ययने छात्राणाम् अनवधानं शिक्षकाणां प्रमुखा समस्या भवति, अनवधानेन छात्राणां विषयस्योपलब्धि: प्रभावितो भवति। अनेनानुसन्धानेन प्राप्तनिष्कर्षाधारेण व्याकरणशिक्षणे विशिष्य प्रत्ययानामध्यापने जायमानानां समस्यानां समाधानाय उपायानां प्रस्तावो क्रियते यत् आदौ अध्यापकेभ्य: विषयस्य प्रकृति: अनुशीलनीया अनन्तरं छात्राणां विषयेऽस्मिन् अभिवृत्तिस्तरस्य आंकलनं विधीय विषयस्य प्रस्तुतीकरणं सरलं रुचिकरीत्या च करणीयम्। इदं प्रस्तुतीकरणं छात्रेषु विषयं प्रति स्वीकारात्मकाभिवृत्ते: अभिवर्धकं भवेत् । इत्येतदर्थं अध्यापकै: अभिक्रमितानुदेशनस्योपयोग: सर्वथोचित: भविष्यति । अनुदेशनस्य स्वरूपं किमपि भवितुं शक्यते परन्तु तेषु अपि सङ्गणकसहानुदेशनमन्यतमं भवति, अनुदेशनस्याभावे सति अध्यापकै: स्वयमेव अनुदेशनस्य निर्माणं कर्तुं प्रयासो कत्र्तव्य: अनेन अध्यापकेभ्य: तस्मिन् विषयस्य गहनाध्ययनस्यावसरोऽपि समुपलभ्यते तथा अध्यापकेभ्य: निर्मितेनानुदेशनेन छात्राणां विषयं प्रति अभिवृत्तौ स्वीकारात्कं परिवर्तनं जायते। तेन च छात्रा: तस्य विषयस्य अध्ययनार्थं स्वत: प्रेरिता: भविष्यति। स्वत: प्रेरितानां छात्राणामुपलब्धिस्तरोऽपि उन्नत: भवति। अत: अध्यापकै: न केवलं व्याकरणशिक्षणे अपितु यथाशक्यं स्वस्याध्यापने अनुदेशनस्य उपयोग: करणीय:।

## अभिभावकेभ्य: प्रस्तावा:

अधुना अभिभावका: अपि छात्राणाम् अध्ययनं प्रति तथैव सजगास्सन्ति यथा कश्चन अध्यापक: भवति। मम बालक: अमुक् विषये अवधानं न ददाति, अमुक विषय: मम बालकाय कठिनतमो वर्तते, अथवा तस्मिन् विषये मम बालकस्य रुचिरेव नास्तीति बहुधा उक्तवद्भय: अभिभावकेभ्य: कष्टाय भवति। तदर्थं तै: नैके उपाया: क्रियन्ते। परन्तु उपरोक्तानां कथनानां वास्तविकं कारणं ज्ञातुं ते असमर्था: भवन्ति। अत: अभिभावकेभ्य: अपि निम्ना: प्रस्तावा: क्रियन्ते। यत् अभिभावकेभ्य: तादृशाणां विषयाणाम् अध्ययनार्थं आपणेषु उपलब्धा: अनुदेशनसामग्रया: छात्रेभ्य: प्रदातव्या:। तथा विद्यालयेषु अध्यापका: अपि अनुदेशनेन पाठयितुं प्रेरणीया:। विषयं प्रति अभिवृत्ते: प्रभावो विषयस्योपलब्धौ जायते अत: अभिभावकेभ्य: इदमवश्यं ध्यातव्यं यत् छात्रेषु विषयं प्रति स्वीकारात्मकाभिवृत्ते: सम्वर्धनं भवेदिति।

## छात्रेभ्य: प्रस्तावा:

छात्रा: शिक्षणप्रक्रियाया: केन्द्रं भवन्ति। प्राय: छात्रै: अनुभूयते यत् संस्कृतं कठिनं तत्रापि व्याकरणं कठिनतममिति अत: संस्कृते अङ्का अपि न्यूना: प्राप्यन्ते। परन्तु काठिन्यं नास्ति तत्र कारणं वस्तुत: अनवधानं तत्र प्रमुखं कारणम् अनवधानञ्च नकारात्मकाभिवृत्ते: कारणात् जायते अत: सर्वादौ छात्रेभ्य: विषयं प्रति आत्मसम्प्रत्यय: अनुशीलनीय: अर्थात् अहं विषयेऽस्मिन् क्रियत् जानामि तदनुशील्य विषयस्योपगिताया: विषये चिन्तनीयं यथा व्याकरणस्य भाषायां का उपयोगिता अथवा प्रत्ययानां भाषायां का उपयोगिता अनन्तरं तस्य विषयस्य अभिक्षमताया: विषये विचारणीयं यत् विषये के गुणा: सन्ति ये भाषायां सहाय्यं प्रयच्छन्ति अन्ते च काठिन्याशीलनं करणीयम् अर्थात् विषयेऽस्मिन् कुत्र समस्या अनुभूता इति। एवं प्रकारेण चिन्तनं विधीय अभिक्रमितानुदेशनेन अध्ययनं कर्तुं प्रयास: करणीय:। समुचितानुदेशनेन पाठयितुं अध्यापका: निवेदनीया: तथा स्वयमपि अन्तर्जालद्वारा उचितानुदेशनम् अनविष्य पठितुं प्रयासं करणीयम्। तदर्थम् अध्यापकस्य अभिभावकस्य च सहाय्यं स्वीकत्र्तव्यम्। कस्यचिदपि विषयस्य अध्ययने तस्य विषयस्य विशिष्टांशानां ज्ञानं करणीयं यथा अनुसन्धानेऽस्मिन् प्रत्ययानां अध्याये प्रत्ययानां सामान्यज्ञानं, प्रकृतिप्रत्यययो: ज्ञानं, प्रत्ययै: पदनिर्माणज्ञानं, प्रत्ययानां वाक्ये प्रयोगज्ञानं, प्रत्ययनियमानां ज्ञानमिति विशिष्टांशा: निर्धार्य प्रत्ययस्य सम्यग् अध्ययनार्थं सङ्गणकसहानुदेशनं निर्मितं तथैव अध्ययनकाले विषयस्य सामान्यज्ञानं, विशिष्टज्ञानं, प्रायोगिकज्ञानमिति प्रमुखाणामंशानां ज्ञानाय छात्रेभ्य: प्रयास: करणीय:।

**(एषः शोधसारांशः "छात्राभिवृत्त्युपलब्ध्योः सन्दर्भे संस्कृतप्रत्ययाधारितसङ्गणकसहानुदेशनसामग्र्याः विकासः मूल्याङ्कनञ्च" इति विषयकस्य शोधस्य अस्ति । एतत् अनुसन्धानं विद्यावारिधेः उपाधेः कृते राष्ट्रियसंस्कृतसंस्थानस्य अधीने २०१२ - २०१५ वर्षमध्ये कृतम् ।)**

**सन्दर्भग्रन्थसूची –**

आप्टे, वामन शिवराम - संस्कृत हिन्दी शब्दकोश, नई दिल्ली, कमल प्रकाशन

| | | |
|---|---|---|
| कुलश्रेष्ठ, सरोजिनी | - | संस्कृत व्याकरण और रचनाज्ञान, जयपुर, राष्ट्रीय संस्कृत साहित्य केन्द्र, 2003 |
| झा, उदय शंकर | - | अधिगमकौमुदी, वाराणसी, चौखम्भ सुरभारती प्रकाशन, 2013 |
| द्विवेदी, कपिलदेव | - | प्रौढ रचनानुवादकौमुदी, वारणसी, विश्व विद्यालय प्रकाशन, 2006 |
| दीक्षित, पुष्पा | - | अष्टाध्यायी सूत्रपाठः प्रकरणनिर्देशसमन्वितः दिल्ली, ज्ञानभारती पब्लिकेशन्स,2009 |
| दीक्षित, पुष्पा | - | शीघ्रबोधव्याकरणम्, दिल्ली, प्रतिभा प्रकाशन, 2007 |
| पञ्चोली, श्री बालकृष्ण | - | वैयाकरणसिद्धान्तकौमुदी, वाराणसी, चौखम्भा संस्कृत संस्थान, 2008 |
| पाण्डेय रामाज्ञा | - | व्याकरणदर्शनभूमिका, वाराणसी, अनुसन्धान संस्थान निदेशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालय, 1982 |
| पाण्डेय, के.पी.एवं अमिता | - | शिक्षा में क्रियात्मक अनुसन्धान, आगरा, अग्रवाल पब्लिकेशन्स,2012 |
| बरखेडी, श्रीनिवास | - | गणकपाणिनीयम्, हैदराबाद, संस्कृत अकादमी,2010 |
| मिश्र. आजाद | - | संस्कृत के प्रत्ययों का भाषाशास्त्रीय पर्यालोचन, लखनऊ, मधुकर प्रकाशन, 1989 |
| मिश्र, गोपबन्धु | - | कृत्-प्रत्ययविश्लेषण, आरा (बिहार) संस्कृतप्रसारपरिषद्. 2005 |
| मिश्र, रमाकान्त | - | शैक्षिकप्रविधिः, वाराणसी चैखम्बा सुरभारती प्रकाशन |
| मिश्रा, महेन्द्र कुमार | - | संस्कृत शिक्षण, जयपुर, श्याम प्रकाशन, 2007 |
| शर्मा, वी. मुरलीधर | - | संस्कृतशिक्षकप्रशिक्षणे सूक्ष्यशिक्षणम्, हैदराबाद, 1996 |